नवग्रह स्तॊत्रं

जपा कुसुम संकाशं काश्यपॆयं महाद्युतिं
तमॊरिं सर्व पापघ्नं प्रणतॊस्मि दिवाकरं
दधिशंख तुषाराभं क्षीरार्णव समुद्भवं
नमामि शशिनं सॊमं शंभॊर्मुकुटभूषणं
धरणीगर्भ संभूतं विद्युत कांति समप्रभं
कुमारं शक्तिहस्तंतं मंगळं प्रणमाम्यहं
प्रियंगुकालिकाश्यामं रूपॆणाप्रतिमांबुधं
सौम्यंसत्वगुणॊपॆतं तं बुधं प्रणमाम्यहं
दॆवानांच ऋषिणांच गुरुंकांचन सन्निभं
बुद्धिमंतं त्रिलॊकॆशं तं नमामि बृहस्पतिं
हिमकुंदमृणालाभं दैत्यानां परमं गुरुं
सर्व शास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहं
नीलांजन समाभासं रविपुत्रं यमाग्रजं
छायामार्तांड संभूतं तं नमामि शनैश्चरं
अर्धकायं महावीर्यं चंद्रादित्य विमर्धनं
सिंहिकागर्भ संभूतं तं राहुं प्रणमाम्यहं
फलाषपुष्प संकाशं तारकाग्रह मस्तकं
रौद्रं रौद्रात्मकं घॊरं तं कॆतुं प्रणमाम्यहं
इति व्यासं मुखॊद्गीतं य: पठॆस्तु समाहितौ
दिवावाय दिवारात्रौ विघ्न: शांतिर्भविष्यति

www.yousigma.com

नर नारी नृपाणांच भवे दु:स्वप्न नाशनं
ऐश्वर्यमतुलां तेषां आरोग्यं पुष्टिवर्धनं
ग्रह नक्षत्र जा:पीडा स्तस्कराग्नि समुद्भवां
ता: सर्वा: प्रशमं यांति व्यासो ब्रूते न संशय:
ओं इति श्री नवग्रह स्तोत्रं संपूर्ण

www.yousigma.com